This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

क. का. संस्कृत विश्वविद्यालय, रामटेक.
हस्तलिखित संग्रह

दाखल क्र.-444 विषय- पुराण
नाव - अध्यात्मरामायण (बालकाण्ड)
लेखक / लिपीकार (मुद्रित)
पृष्ठ - 17 काल - अपूर्ण

Checked 2012

M-444-W

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ACC.NO 424

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वीदृशस्यमनुष्यादिदेहधारणंकथंअतआह स्वमाययेति अघटितघटनाशक्तिरूपामाया मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्व
रमितिश्रुतिसिद्धांतयाइदंकृत्स्नंदृश्यंमृत्वांतर्बहिरास्थितोयः तत्सृष्ट्वा तदेवानुप्राविशदितिश्रुतेः तादृशस्यमनुष्यशरीरपरिग्रहो
नाश्चर्याय तदुक्तंगीताभाष्ये भूतानामीश्वरोनित्यशुद्धबुद्धस्वभावोपिस्वमायायादेहवानिवजातइवचलोकानुग्रहंकुर्वन् लक्ष्यते
प्रयोजनाभावेपिभूतानुजिघृक्षयेति नन्वेवंसर्वगतत्वेसर्वज्ञेयः किंनेत्यतआह सर्वांतरस्थोपिनिगूढआत्मेति यःपृथिव्यांतिष्ठन्
पृथिव्यामंतरइत्यादिश्रुत्यासर्वांतरस्थत्वेनोक्तोपिनिगूढः एषुसर्वेषुभूतेषुगूढात्मानप्रकाशते दृश्यतेत्वग्र्यया बुध्यासूक्ष्मयासूक्ष्मद
र्शिभिरितिश्रुतेः तादृशस्यसत्यव्यवहारकालिकमपिमानमाह स्वमाययेति स्वाज्ञानकल्पितयामायायेत्यर्थः अयंभावः नित्यशुद्धा
दिरूपेश्वरस्वरूपाज्ञानेन तस्याऽघटितघटनासामर्थ्यापरपर्यायामायाख्यात्रिगुणाशक्तिरूपाधिकल्पितावछेदैस्तत्तत्स्वरूपैर्जीवैः क-

**स्वमाययाकृत्स्नमिदंहिसृष्ट्वानभोवदंतर्बहिरास्थितोयः सर्वांतरस्थोपिनिगूढआत्मास्वमाययासृ
ष्टमिदंविचष्टे १८**

ल्पितासाचस्वसजातीयमेवसंसारमुत्पादयंप्रसूते अतएवतत्स्वरूपज्ञानेसकार्यायास्तस्यानाशः रज्जु
ज्ञानेनैवरज्जुकल्पितभुजंगस्यभयकंपादिकार्यसहितस्य नचजीवैस्तत्कल्पनातत्सृष्टोपाधिभिश्चजीवतेत्यन्योन्याश्रयः अनादित्वे
नापिपरिहारात् नन्वेकस्यतत्त्वज्ञानेनतन्नाशेसंसारोच्छेदापत्तिः एकरज्जोर्युगपद्भ्रानांसर्पभ्रमेएकस्यरज्जुज्ञानेनतस्यसर्पभ्रमेत
त्कार्येभयकंपादौनिवृत्तेपि अन्येषांतद्दर्शनेनतदनिवृत्तिवदुपपत्तेरितितयासृष्टमिदंविचष्टेपश्यति एवंचद्रष्टृत्वेनतत्सिद्धिः नान्यो
तोस्तिद्रष्टेतिश्रुतेः एकेनैवाकाशेनोपाधिभेदात् घटाकाशादिव्यवहारवत् एकेनैवचेतनोपाधिभेदादनेकजीवव्यवहारोपपत्तौचेत
नानेकत्वेमानाभावात् द्रष्टृत्वेनतत्सिद्धिरितिभावः नचतत्तदज्ञानरूपोपाधिविशिष्टस्यैवजीवत्वेजीवस्याज्ञानमितिव्यवहारानापत्तिः
भार्याविशिष्टस्यैवगृहस्थत्वेपिगृहस्थस्यभार्येतिवदुपपत्तेरितिदिक् १८ ७ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेतनस्वीकारेमानांतरमाह जगंतीति जगंतिजगदंतःकरणानियत्सन्निधौनित्यंपरितोभ्रमंति स्वस्वचेष्टांकुर्वंति अन्यथासर्वस्यज
डत्वाच्चेतनाभावेजगदांधर्यप्रसंगइतिभावः ननुनिष्कलंनिष्क्रियंशांतमितिश्रुतेस्तस्यनिष्क्रियतयाकथंतेनान्येषांव्यापारसंपादनम
तआह चुंबकलोहवद्धीति यथानिष्क्रियोपिचुंबकमणिर्लोहंशक्तिविशेषात् सन्निधिमात्रेणचालयति तथाचेतनोनिष्क्रियो
पिस्वमायायावैचित्र्यादेवतानिसन्निधिमात्रात्व्यापारयतीत्यर्थः तदुक्तमाचार्यैः अनापन्नविकारः सन्नयस्कांतवदेवयः बुध्या

**जगंतिनित्यंपरितोभ्रमंतियत्सन्निधौचुंबकलोहवद्धि एतन्नजानंतिविमूढचित्ताःस्वाविद्ययासं
वृतमानसाये १९ स्वाज्ञानमप्यात्मनिशुद्धबुद्धेस्वारोपयंतीहनिरस्तमाये संसारमेवानुसरंतित
वेपुत्रादिसक्ताःपुरुकर्मयुक्ताः २०**

दीश्वालयेत् प्रत्यक्सोहमित्यवधारयेदिति एतत्मा
यागुणास्पष्टत्वादिरूपंरामस्वरूपंयेजीवानजानंति अज्ञानेहेतुः विमूढचेतसः विमूढचेतस्त्वेहेतुः स्वाविद्ययासंवृतमानसाइ
ति स्वोपाधिभूतयाः विद्ययाविद्याविरोधिभावदार्ढ्यरूपयासंवृतांतःकरणाः १९ अतस्तेजीवाः शुद्धबुद्धे शुद्धत्वंमायादोषाना
वृतत्वेन बुद्धेज्ञानस्वरूपेनिरस्तमायेस्वज्ञानवतांनिरस्तामायायेनतादृशो मामेवयेप्रपद्यंतेमायामेतांतरंतितेइतिगीतोक्तेः ईदृशे
रामेस्वाज्ञानंसकृतरामारोपयंति स्वयमज्ञत्वात्तराममज्ञमितिजानंतीत्याशयः तेषांदुष्टफलमाह संसारमिति तेपुत्रादिसक्ताः पुरुक
र्मयुक्ताः भूरियज्ञादिकर्मयुक्ताः संसारमेवानुसरंति २० ७ ७ ७ ७ ७ ७ ७



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतस्तेयथाज्ञाः कंठगतंचामीकरंस्वर्णालंकारंयथानजानंति एवंहृदयेस्थितंरामंतेनजानंति अतःसंसारमेवानुसरंतीत्यर्थः किं च परात्मन्यज्ञानसंभवइतिदृष्टांतेनाह यथेति अप्रकाशस्तमोयथारवौज्योतिःस्वभावेज्योतिःस्वरूपेनविद्यते तथाविशुद्धविज्ञानेननिर्विशेषापरोक्षज्ञानेनघनेनिबिडेपरतःपरमात्मनिउत्कृष्टेभ्योप्युत्कृष्टेरामेअविद्याकथंस्यात् तादृशेवस्तून्यविद्यानवकाशादितिभावः तदुक्तमाचार्यैः अप्रकाशोयथादित्येनास्तिज्योतिःस्वभावतः नित्यबोधस्वरूपत्वान्नाज्ञानंतद्वदात्मनीति २१ न

जानंतिनेवंहृदयेस्थितंवैचामीकरंकंठगतंयथाज्ञाः यथाप्रकाशोनतुविद्यतेरवौज्योतिःस्वभावेपरमेश्वरेतथा विशुद्धविज्ञानघनेरघूत्तमेविद्याकथंस्यात्परतः परात्मनि २१ यथाहिचाक्षुषाभ्रमतागृहादिकंविनष्टदृष्टेभ्रमतीवदृश्यते तथैवदेहेंद्रियकर्तुरात्मनःकृतपरेऽध्यस्यजनोविमुह्यति २२

नुस्वाज्ञानेनराममज्ञंव्यवहरतिजनइत्युक्तमसंगतंअन्यगतस्यान्यत्रारोपासंभवादित्याशंक्यसदृष्टांतंतथामोहंजीवउपपादयति यथाविनष्टदृष्टेः दोषयुक्तदृष्टेः पुरुषस्यभ्रमताक्ष्णागृहादिकंभ्रमतीवोत्प्रेक्षेयं भ्रमतिवेत्तिगृह्यते तेनैवनष्टदृष्टिनापुरुषेणेतिशेषः तथैवदेहेंद्रियावच्छिन्नस्यकर्तुरात्मनोंतःकरणस्याहंकारास्पदस्यकृतंपरेसर्वधर्मालिप्तेतदवच्छिन्नेचेतनेध्यस्यजनोजीवोमुह्यति अहंकर्तेतिमोहं प्राप्नोति एवंचयथाक्षिगतभ्रमणस्यगृहादावारोपः यथाचांतःकरणधर्मस्यकर्तृत्वादेरात्मन्यारोपस्तथास्वाज्ञानस्य रामेआरोपइत्याशयः २२ ७ ७ ७ ७ ७ ७ ७ १२ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवतिरामेस्वतोज्ञानमसंभवीतिपुनरपिदार्ढ्यायोक्तयुक्त्येवाह नाहइति सूर्यप्रतिरात्रिदिवसविभागाभावेहेतुः प्रकाशरूपाव्यभिचारतः क्वचित् क्वापीत्यर्थः ज्ञानाज्ञानयोर्भगवत्यनवस्थितौहेतुः शश्वच्चित्घनत्वम् २३ उपसंहरति तस्मादिति परानंदमये सर्वभूतैरेतदानंदमात्रायाउपजीवनात् विज्ञानरूपेनिर्विकल्पकज्ञानरूपे तमोज्ञानरूपं तमोसंबंधेहेतुद्वयम् अज्ञानसाक्षित्वं-मायाधिष्ठातृत्वरूपं मायाश्रयत्वंचमोहकारणंतमोज्ञानंयोयन्मायाधिष्ठातासतद्विषयाज्ञानहीनइतिलोकेदर्शनादितिभावः न-

**नाहोनरात्रिः सवितुर्यथाभवेत्प्रकाशरूपाव्यभिचारतः क्वचित् ज्ञानंतथाज्ञानमिदंद्वयंहरौरामे कथंस्थास्यतिशश्वच्चित्घने २३ तस्मात्परानंदमयेरघूत्तमेविज्ञानरूपेहिनविद्यतेतमः अज्ञा नंसाक्षिण्यरविंदलोचनेमायाश्रयत्वान्नहिमोहकारणं २४ अत्रतेकथयिष्यामिरहस्यमपिदु-र्लभं सीतारामममरुत्सूनुसंवादंमोक्षसाधनं २५ पुरारामायणेरामोरावणंदेवकंटकं हत्वारण-श्लाघीसपुत्रबलवाहनं २६ सीतयासहसुग्रीवलक्ष्मणाभ्यांसमन्वितः अयोध्यामगमद्रा-मोहनुमत्प्रमुखैर्वृतः २७**

न्वेवंसतिब्रह्मादाशरथेर्यद्दुक्त्येवापानुदत्तमः इत्याद्याचार्योक्तेः कागतिरितिचे त्श्रृणु रावणवधार्थंमनुष्यत्वनाटनायभगवतासंकल्पपूर्वकंकृतस्यस्वमहात्म्याछादनस्य तत्रतमः शब्देनोक्तेरदोषात् उ क्तंहिसंक्षेपशारीरके संकल्पपूर्वकमभूद्रघुनंदनस्यनाहंविजानइतिकंचनकालमेतत् ब्रह्मोपदेशमुपलभ्यनिमित्तमात्रंत श्चोत्ससर्जसकृतेसतिदेवकार्येइति भागवतेप्युक्तम् स्त्रीसंगिनांगतिरितिप्रथयश्चकारेति २४ मरुत्सूनुः वायुपुत्रः हनु मान् २५ रामायणेरामायणप्रवर्तके रामावतारकालेइत्यर्थः देवकंटकंदेवद्रोहिणम् २६ २७ ७ ८ ५



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवंविधोरामश्चेज्जगत्कारणत्वाद्यसंभवस्तस्मिन्नितिकुतोजगदुत्पत्त्यादीत्यतआह मामिति मूलप्रकृतिंसर्वजगदुपादानकारणमित्यर्थः प्रकृतिशब्दस्योपादानकारणेसिद्धेतत्तदुपादानकारणानांमहदादीनामप्युपादानकारणत्वान्मूलप्रकृतित्वमस्याः मांमायांतुप्रकृतिंविद्यादितिश्रुतिप्रसिद्धं ब्रह्मण्यध्यस्तां ततोभेदाभेदाभ्यांसत्वाभ्यांचानिर्वचनीयामनादिमेश्वरींमायां ऐश्वरीत्वंचास्याईश्वरस्वरूपाज्ञानरूपत्वेनेतिबोध्यम् एषाचजीवाश्रितैवेश्वरसन्निधानात्तद्रूपेणविवर्तनइतिबोध्यम् मूलप्रकृतित्वमेवस्फुटयति सर्गस्थित्यंतकारिणीमिति उत्पत्तिस्थितिप्रलयकर्त्री नन्वेवंतर्हिक्षतबहुस्यांप्रजायेयेतिश्रुतेः पतीवाइमानिभूतानिजायंते येनजातानिजीवंति यत्प्रयंत्यभिसंविशंतीतिब्रह्मप्रकरणस्थश्रुतेश्चब्रह्मणोजगत्कारणत्वंलभ्यते तद्विरुध्येतेत्य-

मांविद्धिमूलप्रकृतिंसर्गस्थित्यंतकारिणीम् तस्यसन्निधिमात्रेणसृजामीदमतंद्रिता ३४

वाह तस्यसन्निधीति यथैंद्रजालिकमायाशक्तेस्तत्तन्मंत्रनिष्ठायाऐंद्रजालिकंविनानस्वकार्यसामर्थ्यंतथास्याःशक्तेस्तत्सन्निधानेनैवजगत्सृष्ट्वमितितत्र तदुपचारः यथागृहिणीवैशिष्ट्येनैवसिद्धस्वरूपस्यगृहस्थस्यस्वसंबंधजसंकल्पवशवर्तीनीगृहिणीतथामायावैशिष्ट्येनैवसिद्धेस्येश्वरस्यसंगजतत्संकल्पवशवर्तिन्यहमित्याह अतंद्रिता तत्संकल्पितेर्थेनिरालस्येत्यर्थः तदुक्तंवाल्मीकीयेरामंप्रतिकालवचनेन संक्षिप्येहपरान्लोकानेकस्त्वंमाययासह भार्ययाशुभयादेव्यामांत्वंपूर्वमजीजनदिति एवंचमद्गतजगत्सृष्ट्वादेस्तत्रारोपइतिभावः ३४ अनंमःपरम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यपिमायाशब्दस्थलेईश्वरेएवजगदुपादानत्वंनिमित्तत्वंच जगतस्तदुपादानंमायामादायतामसीं निमित्तंशुद्धसत्वांतामुच्यतेब्रह्मत-
द्विरेति अभियुक्तोक्तेस्तथापिविशिष्टस्यविशेषणविशेष्योभयानतिरेकेणमायागतस्यतस्यभगवत्यारोपेणेवतथाव्यवहारइत्याह तदि



तत्सान्निध्यान्मयासृष्टंतस्मिन्नारोप्यतेबुधैः अयोध्यानगरेजन्मरघुवंशेनिर्मले ३५
विश्वामित्रसहायत्वंमखसंरक्षणंततः अहल्यापापशमनंचापभंगोमहेशितुः ३६
मत्स्याणिग्रहणेपश्चाद्भार्गवस्यमदक्षयः अयोध्यानगरेवासोमयाद्वादशवार्षिकः ३७

ति यतस्तत्सान्निध्यान्मयासृष्टमतस्तत्सृष्ट्यादिअबुधैस्तत्स्वरूपानभिज्ञैस्तत्रारोप्यते रज्जौसर्पइवेतिभावः एतदेवदृढयितुंकानिचि
त्स्वरूपाणि तत्रारोप्याणिदर्शयति अयोध्येत्यादि ३५ ३६ ३७



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मायामारीचमरणंमायागृहीतमृगरूपमारीचमरणमित्यर्थः मायासीतात्दतिरिति तदुक्तंकूर्मपुराणेउत्तरखंडेचतुस्त्रिंशेध्यायेरामस्यस्वभगांभार्यां रावणोराक्षसेश्वरः सीतांविशालनयनांचकमेकालनोदितः गृहीत्वामायया वेषंचरंतींविजनेवने समाहर्तुमनश्चक्रेतापसःकिलकामिनीं विज्ञायसाच तद्भावंस्मृत्वादाशरथिंपतिम् जगामशरणंवन्हिमावसथ्यंशुचिस्मिता प्रपद्येपावकंदेवंसाक्षिणंविश्वतोमुखं आत्मानंदीप्तवपुषंसर्वभूतहृदिस्थितम् इत्याद्यष्टश्लोकानुक्त्वा इतिवन्ह्यष्टकंजप्त्वाद्रामपत्नीयशस्विनी ध्यायंतीमनसातस्थौरामसुन्मीलितेक्षणा अथावसथ्याद्भगवान्हव्यवाहोमहेश्वरः आविरासीत्प्रदीप्तात्मातेजसानिर्दहन्निव सृष्ट्यामायामयींसीतांसरावणवधेच्छया सीतामादायरामेशंपावकोंतरधीयत रूत्वातुरावणवधंरामो लक्ष्मणसंयुतः समादायाभवत्सीतांशंकाकुलितमानसः साप्रत्ययायभूतानांसीतामायामयीपुनः विवेशपावकंदीप्तंददाहज्वलनोपिनां दग्ध्वामाया

## दंडकारण्यगमनंविराधवधएवच मायामारीचमरणंमायासीतात्दतिस्तथा ३८

मयीसीतांभगवानुग्रदीधितिः रामायदर्शयत्सीतांपावकोसौसुरप्रियः एतत्सतिव्रतानांवैमाहात्म्यंकथितंमया स्त्रीणांसर्वाघशमनंप्रायश्चित्तंपरंस्मृतमिति अनेनस्त्रीणामेवंविधोयदि अग्निप्रवेशोनदोषाय विपरीतंसर्वपापहरश्चेतिसूचितं वाल्मीकीयेपिमारीचवधार्थं गतेरामेरामहतेनतेनरामशब्दसदृशशब्देराक्षोशंकृतेलक्ष्मणस्यरामसहायार्थंगमनप्रेरणावसरेअरण्यकांडे अपिलासहरामेणपश्येयंपुनरागतः लक्ष्मणेनेवमुक्तातुरुदतीजनकात्मजा प्रत्युवाचततोवाक्यंतीव्रबाष्पपरिप्लुता गोदावरींप्रवेक्ष्यामिहीनारामेणलक्ष्मण आबंधिष्येथवात्यक्ष्येविषमेदेहमात्मनः विषमेभृग्वादोस्थित्वाननतः प्रपातेनेत्यर्थः पिबामिवाविषंतीक्ष्णंप्रवेक्ष्यामिहुताशनं नत्वहंराघवादन्यंकदापिपुरुषंस्पृशे इतिसीतोक्त्यासूचितोयमर्थः अन्यथैवंप्रतिज्ञायरावणश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीरस्यैजगन्मातुः प्रतिज्ञाहानिःस्यात् तस्मात्सवेक्ष्याग्निहुताशनमिस्पनेनसकर्तव्यार्थएवोक्तइतिमंतव्यम् एतत्प्रवेशादेवहनुमत्पुच्छसंबंधाग्निना लंकादाहोपपत्तिः अन्यथारावणवशीकृतेनलोकपालाग्निनाकथंतन्नगरदाहःस्यात् एतच्छक्तिप्रवेशेतुतस्यस्वातंत्र्यहान्यातदुपपत्तिरित्यलम् ३८ ३९ ४० ४१ एवमादीनिबाह्मणेभ्योदानादीन्यादिशब्दाद्यागादीनि निर्विकारेजन्मादिरहिते आरोपयंति एवंजगत्कर्तृत्वादिकमपिमन्निष्ठमेवरामेआरोपयंतीत्यर्थः ४२ निर्विकारत्वमेवरामस्योपपादयति रामइति निष्कलंनिष्क्रियंशांतमित्यादिश्रुतेः आनंदमूर्तिः आनंदस्वरूपः अचलः कूटस्थः अनन्तः करणपरिणामइतिरज्जुःसर्पात्मनाभाति एतदेवविवर्तोपादानत्वमित्याहुः सच सर्पाकारोंतःकरणपरिणामः सत्त्वासत्त्वाभ्यामनिर्वचनीयइत्युच्यते एवंप्रपंचोप्यनिर्वचनीयइतिदिक् ४२



जटायुषोमोक्षलाभःकबंधस्यतथैवच शबर्याःपूजनंपश्चात्सुग्रीवेणसमागमः ३९ वालिनश्चवधःपश्चात् सीतान्वेषणमेवच सेतुबंधश्चजलधौलंकायाश्चनिरोधनं ४० रावणस्यवधोयुद्धेसपुत्रस्यदुरात्मनः विभीषणेराज्यदानंपुष्पकेणमयासह ४१ अयोध्यागमनंपश्चाद्राज्येरामाभिषेचनं एवमादीनिकर्माणिमयैवाचरितान्यपि आरोपयंति रामेस्मिन्निर्विकारेखिलात्मनि ४२ रामोनगच्छतिनतिष्ठतिनानुशोचत्याकांक्षतेत्यजतिनोनकरोतिकिंचित् आनंदमूर्तिरचलःपरिणामहीनोमायागुणाननुगतोहितथाविभाति ४३

एवपरिणामहीनः मायागुणान् मायया सृष्टपदार्थाननुगतः तदधिष्ठानत्वेनस्थितस्तथाविभाति सृष्टिरूपोभाति यथारज्ज्वच्छेदेनसर्पाकारोंतः करणपरिणामइतिरज्जुःसर्पात्मनाभाति एतदेवविवर्तोपादानत्वमित्याहुः सच सर्पाकारोंतःकरणपरिणामः सत्त्वासत्त्वाभ्यामनिर्वचनीयइत्युच्यते एवंप्रपंचोप्यनिर्वचनीयइतिदिक् ४३



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपस्थितंआत्मनोऽद्वितीयत्वेजीवेश्वरादिव्यवस्थाकथमितिजिज्ञासयोपपन्नं आत्माईश्वरः अनात्माचिदाभासोजीवः परमात्माशुद्धचैतन्यम्
४४ तेषांतत्त्वमेवसदृष्टांतमाह आकाशस्येति एकस्याकाशस्यत्रिविधोभेदः महाकाशोजलाशयावच्छिन्नआकाशः प्रतिबिंबाकाशश्चेतिभेदात्
तदेवाह महानितिमहाकाशइत्यर्थः सएवमहाकाशोजलाशयेतदवच्छिन्नएवभवति तत्रैकजलाशयेपरंप्रतिबिंबाख्यंदृश्यतेएवंनभस्त्रिविधमित्य-
र्थः ४५ एवंदृष्टांतमुपपाद्यदार्ष्टांतिकमाह बुद्धीति सर्वबुद्धिसाक्षितयाबुध्यवच्छिन्नचैतन्यंपूर्णउपाधिमंडलस्थविभुत्वाद्विभुः सकलबुद्धिसम

श्रीमहादेवउवाच ततोरामःस्वयंप्राहहनुमंतमुपस्थितम् शृणुतत्त्वंप्रवक्ष्यामित्वात्मानात्मपरात्मनाम् ४४
आकाशस्ययथाभेदस्त्रिविधोदृश्यतेमहान् जलाशयेमहाकाशस्तदवच्छिन्नएवहि प्रतिबिंबाख्यमपरंदृश्यते
त्रिविधंनभः ४५ बुध्यवच्छिन्नचैतन्यमेकंपूर्णमथापरं आभासस्त्वपरंबिंबभूतमेवंविधाचितिः ४६ ७

ष्टिरेवगायेति तदवच्छिन्नचैतन्यमीश्वरइत्यर्थः अथापरमाभासस्तुबुद्धिप्रतिबिंबभूतोजीवइत्यर्थः अपरंबिंबभूतं एवंचितिस्त्रिधाइत्यर्थः
आभासस्त्वपरंविश्वभूतमितिपाठेबुध्यवच्छिन्नं चैतन्यमेकमित्यंतेन ईश्वरःपूर्णमथापरइत्यनेनशुद्धम् आभासस्त्वपरमितिजीवः जीव-
त्वमेवस्फुटयति विश्वभूतमिति विश्वशब्देनजाग्रदवस्थाभिमानीविशतिदेहेंद्रियादिषिति व्युत्पत्तेः एतत्प्रतिबिंबाकाशस्थानीयमितित्रि
धाचितिरित्यर्थंआहुः तत्रद्वोमिथ्याभूतोउपाध्योर्मिथ्यात्वात् ४६ ७ ७ २ २ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवंशुद्धचैतन्यसाक्षीतिव्यवहारानुपपत्तिः साक्षाद्दृश्याहिसाक्षीनचशुद्धचैतन्येद्रष्टृत्वमित्यतआह साभासेति आभासेनचेतनप्रतिबिंबेनसहि तायाबुद्धेरंतःकरणस्येत्यर्थः तद्गतंकर्तृत्वमबुधैः साक्षिणिआरोप्यतेनेनायंसाक्षिपदवाच्यइत्यर्थः अयमाशयः जानातीत्यादावंतः करणवृत्ति-विशेषरूपाक्रियाज्ञाधातुवाच्याआभासविशिष्टश्चनिङ-र्थआश्रयः परस्पराध्यासेनाभासबुध्योर्विवेकाग्रहात् तदुक्तमाचार्यैः आत्माभासस्तु निङ् वाच्यो धात्वर्थश्चाधियः क्रियाउभयंचाविवेकेनजानातीत्युच्यतेमृषा बुद्धेः कर्तृत्वमध्यस्यजानातीतिज्ञउच्यते तथाचेतन्यमेध्यस्यज्ञत्वंबु-द्धेरिहोच्यतइति आत्माभासइतिबहुव्रीहिः धियोंतःकरणस्य तदेवाहउभयंचेति मृषेति आभासबुद्धितच्चाणांमिथ्यात्वात् अयंव्यवहारोपिमि

**साभासबुद्धेः कर्तृत्वमविच्छिन्नेविकारिणि साक्षिण्यारोप्यतेभ्रांत्याजीवत्वंचतथाबुधैः ४७ आभासस्तुमृषाबुद्धिरविद्याकार्यमुच्यते अविच्छिन्नंतुतद्ब्रह्मविच्छेदस्तुविकल्पितः ४८**

थेत्यर्थः एवंचसाभासबुद्धिगतद्रष्टृत्वस्याविच्छिन्नेपरिच्छिन्नेविकारिणिसाक्षिणिबुद्धितादात्म्यापन्नाभासनादात्म्याध्यासेनारोपः तथाजीवोनित्यः सत्यइत्यादिव्यवहारात्जीवत्वमपितत्रारोपयतइत्यर्थः ४७ आभासमादायतुनतथाव्यवहारसंभवइत्याह आभासस्त्विति तस्यमृषात्वादविद्याकार्यत्वाच्चतथाव्यवहारस्यतमादायनोपपत्तिरित्यर्थः नदर्पणेसुखमस्तिमिथ्येवात्रदर्पणेसुखमाभादित्येवंसर्वसिद्धबाधानुभवात् अतएवा सावविद्याकार्यग्रीवास्थमुखेव आदर्शस्थत्वंसाध्यासिकंनतुवास्तवमितिबोध्यम् आभासासत्यत्वंचाकरेप्रपंचितंविस्तरभयान्नेहोच्यते ननूक्तंत्रैविध्यंकिंचितेर्वास्तवंनेत्याह अविच्छिन्नंविच्छेदोभेदस्तद्रहितम् नन्वियंविधाचितिरित्यसंगतंतत्राह विच्छेदइति भेदइत्यर्थः विकल्पितः उपाध्यध्यासकृतइत्यर्थः एवंजीवानांपरस्परंभेदोप्यध्यासकृतइतिबोध्यम् ४८





CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्पितभेदसत्त्वेप्रमाणमाह अविच्छिन्नस्येति अवच्छेदोभेदस्तद्रहितः आध्यासिकभेदवतःसाभासस्याहमस्तत्त्वमस्यादिवाक्यैःपूर्णेनईश्वरेणएकत्वंप्रतिपाद्यतेतत्तथासतिकल्पितभेदेसतिउपपाद्यतइतिशेषः सर्वथाभेदाभावेतदानर्थक्यंवास्तवेपिभेदेतदानर्थक्यंवास्तवस्यवचनशतेनाप्यनिवृत्तिरितिभावः अत्रावच्छिन्नस्यसाभासस्याहमइत्यनेनत्वंपदार्थोदर्शितः पूर्णेनित्यनेनतत्पदार्थोदर्शितः ४९ एतदेवध्वनयन्नुपदेशफलमाह ऐक्येति आत्मनोर्जीवेश्वरयोः ऐक्यज्ञानंअहंब्रह्मेतिज्ञानंयदेनिकर्मानुष्ठानाद्यपक्षयेसमुत्पन्नंकषायेकर्मभिः पक्वकषायोज्ञानंप्रवर्तनइतिस्मृतेः अयंभावः जीवेश्वरयोरुपाधिभिन्नयोरैक्यश्रुत्योच्यमानंबाधितंसत्तत्त्वंपदयोरुपाधिरहितेलक्षणयाबिंबभूतंशुद्धब्रह्मैक्यपरतयापर्यवस्यतीति

**अविच्छिन्नस्यपूर्णेनएकत्वंप्रतिपाद्यते तत्त्वमस्यादिवाक्यैश्चसाभासस्याहमस्तथा ४९ ऐक्यज्ञानंयदोत्पन्नं महावाक्येनचात्मनोः तदाविद्यास्वकार्यैश्चनश्यत्येवनसंशयः ५०** बोध्यं एतच्चाकरोविस्तरेणप्रपंचितम् ब्रह्मैक्यज्ञानफलमाह तदेति तादृशज्ञानेसतिनिर्धर्मकत्वेनचिन्मात्रतयातत्स्वरूपाज्ञानरूपाविद्यास्वकार्यैःप्रपंचैःसहनश्यत्येवनसंशयः एतेनभ्रष्टबीजवत्कार्याजननासामर्थ्यमेवतस्याज्ञानेनक्रियतइतिपक्षोपास्तः तदुक्तमाचार्यैः सोयमित्यादिवाक्येषुविरोधात्तदंशयोः त्यागेनभागयोरेक आश्रयोलक्ष्यतेयथा मायाविद्येविहायैवमुपाधीपरजीवयोः अखंडसच्चिदानंदपरंब्रह्मैवलक्ष्यते यथासोयंदेवदत्तइत्यादौपूर्वानुभूतत्वरूपताथाइदानीमनुभूयमानत्वरूपेदंतायाश्चत्यागेनदेवदत्तस्वरूपमात्रंलक्ष्यतेमायाबुद्धिसमष्टिरविद्याव्यष्टिरूपेतिबोध्यम् अपरोक्षज्ञानंमननादिसंस्कृतांतःकरणादेवदृश्यतेत्वग्र्यया बुध्येतिश्रुतेः अग्र्ययामननादिसंस्कृतया शास्त्राचार्योपदेशशमदमादिसंस्कृतंमनआत्मदर्शनेकरणमितिगीताभाष्योक्तेश्चेतिदिक् उक्तंचनारदीयेतत्त्वमस्यादिवाक्योत्थज्ञानंमोक्षस्यसाधनमितिश्रुतिरपि तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेयनायेति ५० ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईदृशज्ञानस्यमुख्यंसाधनमाह एतादृति मद्भक्तइति हेतुगर्भंविशेषणम् मद्भावोमत्सायुज्यम् भक्तेः कारणत्वदार्ढ्यायभक्तिव्यतिरेकेकार्यव्यतिरेकमा
ह मद्भक्तीति शास्त्रगर्तेषुशास्त्रबोधनक्रियाकल्पपरूपगर्तेषु ५१ ममात्मनःमद्रूपस्यचेतनस्य ५२ ५३ सर्ववेदांतसंग्रहं सर्ववेदांतप्रतिपाद्यार्थसा



एतद्विज्ञायमन्दक्तोमन्दावायोपपद्यते मन्दक्तिविमुखानांहिशास्त्रगर्तेषुसुत्यताम् नज्ञानंनचमोक्षःस्यान्तेषां
जन्मशतैरपि ५१ इदंरहस्यंहृदयंममात्मनोमयैवसाक्षात्कथितंतवानघ मन्दक्तिहीनायशठायनत्वयादातव्यमेत-
दादपिराज्यनोधिकं ५२ श्रीमहादेवउवाच एतत्तेभिहितंदेविश्रीरामस्यहृदयंमया अतिगुह्यतमंहृद्यंप
वित्रंपापशोधनम् ५३ साक्षाद्रामेणकथितंसर्ववेदांतसंग्रहम् यःपठेत्सततंभक्त्यासमुक्तोनात्रसंशयः ५४
ब्रह्महत्यादिपापानिबहुजन्मार्जितान्यपि नश्यंत्येवनसंदेहोरामस्यवचनंयथा ५५ योतिभ्रष्टोतिपापीप
रधनपरदारेषुनित्योद्यतोवास्तेयीब्रह्मघ्नमातापितृवधनिरतोयोगिहृदापकारी यःसंपूज्याभिरामंपठति
चहृदयंरामचंद्रस्यभक्त्यायोगींद्रैरप्यलभ्यंपदमिहलभतेसर्वदेवैःसपूज्यम् ५६ इतिश्रीमदध्यात्म-
रामायणेउमामहेश्वरसंवादेबालकांडेश्रीरामहृदयंनाम प्रथमःसर्गः १

रसंग्रहरूपं ५४ ५५ अतिभ्रष्टत्वोपपादकमतिपापीत्यादिसर्वदेवैःपूज्यंपदं ब्रह्मलोकंसलभतइत्यन्वयः ५६ इतिश्रीमत्सकलराज
विपदुद्धरणेत्यादिविरुदावलीविराजमानस्यहि० रामवर्मणःकृतोअध्यात्मरामायणसतोबालकांडेप्रथमःसर्गः १



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथपार्वतीशिवोक्तमभिनंदति धन्यास्मीति अनिसंदेहग्रंथिः यदिरामः परंब्रह्मनर्हिकथंतस्यशोकादि यदिशोकादिमत्वाज्जीवः कथंतदोपास्य-
त्वमित्याकारोमहान्संदेहरूपोग्रंथिः विच्छिन्नःनिवृत्तः १ भवःसंसारस्तमपहंविनाशयतितादृशरामतत्वामृतरसायणंरामतत्वरूपममृतजनकं-
मोक्षजनकंरसायणंपिबंत्यामेमनोनतृप्यति २ पुनर्विस्तरेणरामकथांइच्छति श्रीरामस्येति सुष्ठ्वक्षरमितिक्रियाविशेषणम् ३अथमहादेवस्तां

पार्वत्युवाच धन्यास्म्यनुगृहीतास्मिकृतार्थास्मिजगत्प्रभो विच्छिन्नोमेसंदेहग्रंथिर्भवदनुग्रहात् १ त-
न्मुखाद्गलितंरामतत्वामृतरसायणम् पिबंत्यामेमनोदेवनतृप्यतिभवापहम् २ श्रीरामस्यकथात्वत्तःश्रु-
तासंक्षेपतोमया इदानींश्रोतुमिच्छामिविस्तरेणसुष्ठ्वक्षरम् ३ श्रीमहादेवउवाच शृणुदेवि-
प्रवक्ष्यामिगुह्याद्गुह्यतरंमहत् अध्यात्मरामचरितंरामेणोक्तंपुरामम ४ तद्वयंकथयिष्यामिशृणुतापत्र
यापहम् यच्छ्रुत्वामुच्यतेजंतुरज्ञानोत्थमहाभयात् प्राप्नोतिपरमामृद्धिंदीर्घायुःपुत्रसंततिम् ५

कथांविवक्षुस्तत्रश्रोतृप्रवृत्तयेतत्प्रशंसामाह शृण्विति आत्मस्मित्यध्यात्मं सर्वात्मकअंतर्यामितयास्थितस्यरामस्यचरितंतद्वर्णनरूपंकाव्यं ४
तापत्रयंआध्यात्मिकाधिदैविकाधिभौतिकरूव्यदुःखत्रयम् तत्राद्यंरोगादिजं कामक्रोधादिजंचद्वितीयं चोरादिनिमित्तंतृतीयं गृह्याद्यावेशनिमित्तं ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंप्रस्तौतीति भूमिरिति रक्षोगणानांभारेणमग्ना स्वाधारजलेमग्ना गोरूपंधृत्वादेवादिभिः सहाज्ञासनस्यब्रह्मणोलोकंगत्वा ब्रह्मणेउपगतं स्वयंप्राप्तंसर्वंव्यसनंप्राह सत्यमुहूर्तेध्यात्वासकलंदुःखकारणंतन्निवृत्तिकारणंचहृदावेदअजानन् तत्रहेतुः अशेषात्मकत्वात् सर्वस्वसृज्यसमष्टिरूपत्वादित्यर्थः ६ तस्मादिति अनंतरमपिइतिशेषः तदनंतरंध्यानानंतरमित्यर्थः देव्याचभूम्याचसहितइतिशेषः अखिललोकहृत्स्थंसर्वांतर्यामिणमित्यर्थः सवाएषआत्माहृदीतिश्रुतेः अजरंएषमहानात्माअजरइतिश्रुतेः सर्वज्ञंयःसर्वज्ञः सर्वविदितिश्रुतेः ईशंएषसर्वेश्वरइ

भूमिर्भरेणमग्नादशवदनसुरक्षोगणानांधृत्वागोरूपमादौदिविजमुनिजनैः साकमज्ञासनस्य गत्वा-
लोकंरुदंतीव्यसनमुपगतंब्रह्मणेप्राहसर्वं ब्रह्माध्यात्वामुहूर्तंसकलमपिहृदावेदशेषात्मकत्वात् ६ तस्मात्क्षीरस-
मुद्रतीरमगमद्ब्रह्मार्थदेवैर्वृतोदेव्याचाखिललोकहृत्स्थमजरंसर्वज्ञमीशंहरिम् अस्तौषीच्छ्रुतिसिद्धनिर्मलपदैः
स्तोत्रैःपुराणोद्भवैर्भक्त्यागद्गदयागिरातिविमलैरानंदबाष्पैर्वृतः ७ ततःस्फुरत्सहस्त्रांशुसहस्रसदृशप्रभः आ
विरासीद्धरिःप्राच्यांदिशांव्यपनयन्तमः ८ कथंचिद्दृष्टवान्ब्रह्मादुर्दर्शमकृतात्मनां इंद्रनीलप्रतीकाशंस्मिना-
स्यंपद्मलोचनम् ९

निश्रुतेः हरिंहराम्यघंहिस्मर्तॄणांहविर्भागंकृतोतथा वर्णश्चमेहरिर्यस्मात्तस्माद्धरिरहंस्मृतइतिस्मृतेः श्रुति-
सिद्धनिर्मलहरिविष्णुप्रभृतिपदयुक्तैःपुराणोद्भवैस्तोत्रैरित्यर्थः भक्तिमूलिकैर्वचगद्गदवाणीभक्तिजत्वादेवानंदबाष्पाणांविमलत्वम् ७ सह-
स्त्रांशुसहस्रंसूर्यसहस्रं ८ अकृतात्मनाम् ज्ञानहीनानांतेजोराशित्वात्कथंचिद्दर्शनम् ९





CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ पार्षदगणाः११ स्वर्णवर्णांबरंपीतांबरं १२ १३ प्राणःक्रियाशक्तिप्रधानोंशः तेनकर्मेंद्रियसंग्रहः बुद्धींद्रियाणिश्रोत्रादीनि आत्मा मनः तैःकारणभूतैः नतोस्मिकर्मपाशान्मुमुक्षुभिर्यसदंहृदिचिंत्यतेइत्यन्वयः १४ गुणमय्यासत्वरजस्तमोगुणयुक्तयामायया सचिवयाजगत्सृजसि ते

किरीटहारकेयूरकुंडलैः कटकादिभिः विभ्राजमानंश्रीवत्सकौस्तुभप्रभयान्वितम् १० स्फुरद्भिःसनकाद्येश्चपार्षदैः परिवेष्टितम् शंखचक्रगदापद्मवनमालाविराजितम् ११ स्वर्णयज्ञोपवीतेन स्वर्णवर्णांबरेणच १२ श्रियाभूम्याचसहितंगरुडोपरिसंस्थितम् हर्षगद्गदयावाचास्तोतुंसमुपचक्रमे १३ ब्रह्मोवाच नतोस्मितेपदंदेव प्राणबुद्धींद्रियात्मभिः यच्चिंत्यतेकर्मपाशात्हृदिनित्यंमुमुक्षुभिः १४ मायागुणमय्यालंसृजस्यवसिलुंपसि जगत्तेननतेलेपआनंदानुभवात्मनः १५ तथाशक्तिर्नदुष्टानांदानाध्ययनकर्मभिः शक्त्यात्मनातेयशसिसदाभक्तिमतांयथा १६ अतस्त्वांघ्रिंमदृष्टश्चित्तदोषापनुत्तये सद्योतर्द्धदयेनित्यंमुनिभिः सात्वतेर्हृतः १७ ब्रह्माद्यैः स्वार्थसिध्यर्थमस्माभिः पूर्वसेवितः अपरोक्षानुभूत्यर्थंज्ञानिभिर्हृदिभावितः १८ नचस्रष्टृत्वादिनातेऽपोहंस्रष्टेत्याद्यभिमानोननत्रहेतुगर्भंविशेषणं आनंदानुभवात्मनःआनंदाभिन्नानुभवरूपआत्मायस्यतस्य एवंचस्वस्वरूपापरोक्षेणसर्वंत्रमिथ्यादृश्यातदभिमानरहितइतिभावः १५ दुष्टानांमलिनांतःकरणानांशक्त्यात्मनाशक्त्यंतःकरणना तेयशसितवगुणकीर्तने १६ सात्वतैःभक्तैः हृतोंतर्हृदयेसद्योदृष्टस्त्वांघ्रिंमेचित्तदोषापनुत्तयेऽस्तिविशेषः १७ स्वार्थसिद्ध्यर्थंस्वकर्तव्यसृष्ट्यादिसिध्यर्थंज्ञानिभिः ज्ञानेच्छुभिः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सपत्निवत् आर्षोह्रस्वः सपत्नीवदित्यर्थः १९ यतः स्वचरणभक्तेषुनवलक्ष्मीतोप्यधिकाभक्तिः प्रीतिः अतः सारनिवेदिनस्त्वद्भक्ताः त्वच्चरणयोर्भक्तिमेव वांछंति २० अतइति यतस्तेभक्तिरेवसंसाररोगभेषजं अतइत्यन्वयः २१ ब्रह्माणंहरिःकिंकरोमीतिबभाषे अथतंहरिरुवाचेत्यर्धः २२ रावणइति रावयामासलोकान्यस्मात्तस्माद्रावणउच्यते इतिभारतोक्तेः मयाब्रह्मणादत्तेनवरेणदर्पितः अहंकृतः वरश्चमनुष्यान्निरिक्षाव



नवांघ्रिपूजान्निर्माल्यतुलसीमालयाविभो स्पर्धतेवक्षसिपद्मलब्धापिश्रीः सपत्निवत् १९ अत स्त्वत्पादभक्तेषुनवभक्तिःश्रियोधिका भक्तिमेवाभिवांछंतित्वद्भक्ताःसारवेदिनः २० अतस्त्वत्पादकमलेभक्तिरेवसदास्तुमे संसारामयतप्तानांभेषजंभक्तिरेवते २१ इतिब्रुवाणंब्रह्माणंबभाषेभगवान्हरिः किंकरोमीतितंवेधाः प्रत्यवाचातिहर्षितः २२ भगवन्रावणोनामपौलस्त्यतनयोमहान् राक्षसानामधिपतिर्मद्दत्तवरदर्पितः २३ त्रिलोकीं लोकपालांश्चबाधतेविश्वबाधकः मानुषेणमृतिस्तस्यमयाकल्याणकल्पिता २४ अतस्त्वंमानुषोभूत्वाजहि देवरिपुंप्रभो श्रीभगवानुवाच कश्यपस्यवरोदत्तस्तपसातोषितेनमे २५ याचितःपुत्रभावायतथेत्यंगीकृतंमया सइदानींदशरथोभूत्वातिष्ठतिभूतले २६



ध्यलरूपः २३ तदेवाह मानुषेणेति २४ कश्यपस्यतपसातोषितेनमे-मयातस्मैवरोदत्तः यत्त्वंयाचिष्यसितत्तुभ्यंदास्यामीति कृतवरदानप्रतिज्ञइत्यर्थः ततस्तेनायंपुत्रभावाययाचितोमयाचतत्तथेत्यंगीकृतमित्यर्थः २५ अहंतस्यपुत्रतामेत्यपुत्रतांप्राप्स्यामीतिसंकल्प्य कौसल्यायांइतरयोः सुमित्राकैकेय्योः अहमेवात्मानंचतुर्धाचतुः प्रकारावयवसंस्थानैः रामलक्ष्मणभरत-शत्रुघ्नेतिचतुःप्रकारनामभिश्च सृजामिस्रक्ष्यामिवर्तमानसामीप्ये लट् २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ १२ न्यसंतन्नगराधिपेराज्ञिकस्मिंश्चिन्यासत्वेनस्थापितं १३महासत्त्वमितिदृढंगंगासमीपगमिति गौतमाश्रमविशेषणं १४ यत्राहल्यातपआस्थिते
त्यन्वयः १५ नानाजंतुभिःनानाप्रकारैः क्षुद्रप्राणिभिरपिहीनं गौतमशापादितिभावः १६ १७ १८ तपसाहरिमाराधयन्स्थितइतिशेषः १९

भोजयित्वासहभ्रात्रारामंपक्वफलादिभिः पुराणवाक्येर्मधुरैर्निनायदिवसत्रयं ११ चतुर्थेहनिसंप्राप्तेकौशिको-
राममब्रवीत् रामराममहायज्ञंद्रष्टुगच्छामहेवयम् १२ विदेहराजनगरंजनकस्यमहात्मनः तत्रमाहेश्वरंचा
पमस्तिन्यस्तंपिनाकिना १३ द्रक्ष्यसित्वंमहासत्वंपूज्यंजनकंनच इत्युक्तामुनिभिस्ताभ्यांययौगंगासमीपगं
१४ गौतमस्याश्रमंपुण्यंयत्राहल्यास्थितातपः दिव्यपुष्पफलोपेतपादपैःपरिवेष्टितम् १५ मृगपक्षिगणैर्हीनंना-
नाजंतुविवर्जितम् दृष्ट्वोवाचमुनिंश्रीमान्रामोराजीवलोचनः १६ कस्येतदाश्रमपदंभातिभास्वच्छुभंमहत् प-
त्रपुष्पफलैर्युक्तंजंतुभिःपरिवर्जितम् १७ आल्हादयतिमेचेतोभगवन्ब्रूहितत्वतः १८ विश्वामित्रउवाच
शृणुराम्पुरावृत्तंगौतमोलोकविश्रुतः सर्वधर्मभृतांश्रेष्ठस्तपसाराधयन्हरिं १९ तस्मैब्रह्माददौकन्यामहल्यां
लोकसुंदरीम् ब्रह्मचर्येणसंतुष्टःशुश्रूषणपरायणां २० तयासार्धंमहावात्मीद्गौतमस्तपतांवरः शक्रस्त
तांधर्षयितुमंतरंप्रेक्षरन्वहम् २१

२० अवात्सीत् वासंकृतवान् तांअहल्यांधर्षयितुं उपभोक्तुं अंतरंमुन्यसान्निध्यरूपंप्रेक्षरासीदितिशेषः २१ ५ ७ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोतमेगृहान्निर्गतेसति मुनिवेषेणतद्गृहंप्रविश्य तांभहल्यांधर्षयित्वोपभुज्यनिरगात् मुनिरपिस्वगृहमगात् २२ स्वरूपेणस्वस्यात्मनोगोतम्य-
रूपेणदुश्चरित्वहेतुः मद्रूपधरत्वम् २३ कामकिंकरंकामपरवशतयाअयुक्तकर्मकरमित्यर्थः २४ २५ २६ शिलायामिति लीनाभूत्वेतिशेषः

कदाचिन्मुनिवेषेणनिर्गतेगोतमेगृहात् धर्षयित्वाथनिरगात्त्वरितंमुनिरप्यगात् २२ दृष्ट्वायांतंस्वरूपेणमुनिःप-
रमकोपनः पप्रच्छकस्त्वंदुश्चरित्वनममरूपधरोधमः २३ सत्यंब्रूहिनचेद्भस्मकरिष्यामिनसंशयः सोब्रवीद्देवरा-
जोहंपाहिमांकामकिंकरं २४ ऋतध्रुगुप्सितंकर्ममयाकृत्वितचेतसा गोतमःक्रोधताम्राक्षःशशापदिविजाधिपं
२५ योनिलंपटदुश्चरित्वनसहस्रभगवान्भव शस्त्वातंदेवराजानंप्रविश्यस्वाश्रमंद्रुतम् २६ दृष्ट्वाहल्यांवेपमा-
नांप्रांजलिंगोतमोब्रवीत् दुष्टत्वंतिष्ठदुर्वृत्तेशिलायामाश्रमेमम २७ निराहारादिवारात्रोतपःपरममास्थिता आ
तपानिलवर्षादिसहिष्णुःपरमेश्वरं २८ ध्यायंतीराममेकाग्रमनसास्थदिसंस्थितम् नानाजंतुविहीनोयमाश्र
मोमेभविष्यति २९ एवंवर्षसहस्रेषुत्वनेकेषुगतेषुच रामोदाशरथिःश्रीमानागमिष्यतिसानुजः ३० यदात्वदा
श्रयशिलांपादाभ्यामाक्रमिष्यति तदैवधूतपापात्वं रामंसंपूज्यभक्तिनः ३१ परिक्रम्यनमस्कृत्यस्तुत्वाशापा
द्विमोक्ष्यसे पूर्ववन्ममशुश्रूषांकरिष्यसियथासुखम् ३२

२६

२७ २८ २९ दृषयास्वयमेवशापांतरमाह एवमिति ३० त्वदाश्रयशिलांत्वत्कृताश्रयशिलाम् ३१ ३२ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदादितस्प्रभृतिशुभेस्वाश्रमेअदृश्याआस्तेइतिशेषः ३३ ३४ ३५ ३६ ३७ चतुर्भुजमिति स्वस्यभगवदवतारत्वप्रख्यापनायमध्येमध्येच
तुर्भुजरूपंकौसल्यामिवदर्शयित्वापुनर्द्विभुजरूपेणैवस्थितइत्याह धनुरिति ३८ ३९ ४० हर्षजन्यंयदश्रुरूपंजलंतद्धकेने-

इत्युक्त्वागौतमःप्रागाद्धिमवंतंनगोत्तमं तदाप्रभृत्याभूतानामदृश्यास्वाश्रमेशुभे ३३ तवपादरजःस्पर्शं
कांक्षतेपवनाशना आस्तेद्यापिरघुश्रेष्ठतपोदुष्करमास्थिता ३४ पावयस्वसुनेभार्यामहल्यांब्रह्मणःसुतां
इत्युक्त्वाराघवंहस्तेगृहीत्वामुनिपुंगवः ३५ दर्शयामासचाहल्यामुग्रेणतपसास्थिताम् रामःशिलांपदा-
स्पृष्टांतांचापश्यत्तपोधनाम् ३६ ननामराघवोहल्यारामोहमितिचाब्रवीत् ततोदृष्ट्वारघुश्रेष्ठंपीतकौशेय
वाससम् ३७ चतुर्भुजंशंखचक्रगदापंकजधारिणम् धनुर्बाणधरंरामंलक्ष्मणेनसमन्वितम् ३८ स्मितव
क्त्रंपद्मनेत्रंश्रीवत्साङ्कितवक्षसम् नीलमाणिक्यसंकाशंद्योतयंतंदिशोदश ३९ दृष्ट्वारामंरमानाथंहर्षविस्फा
रितेक्षणा गौतमस्यवचःश्रुत्वाज्ञात्वानारायणंपरं ४० संपूज्यविधिवद्रामंमाद्यर्घ्यादिभिरनिंदिता हर्षाश्रु
जलनेत्रांतादंडवत्प्रणिपत्यसा ४१ उत्थायचपुनर्दृष्ट्वारामंराजीवलोचनम् पुलकांकितसर्वांगागिरा-
गद्गदयेलत ४२

न्तेयस्याःसा ४१ ऐलतअस्तोषीत् ईड स्तुतावित्यस्मात्लडि.व्यत्ययेनशपोलुगभावः डलयोरेकश्रुतित्वात्लकारोच्चारणम् ४२ ७

अहोइति तेनवपदाब्जसंलग्नरजःकणात् तत्संबंधादहंकृतार्थास्मिमुक्तशापास्मि अहोइत्याश्चर्ये अपरंस्वस्यकृतार्थत्वेहेतुमाह यत्तेपाद पद्मंपद्मजशंकरादिभिः तद्लाभात् रंधितमानसैः पीडितमानसैः सदास्त्रष्टृभिर्मृग्यतेतदहंस्पर्शामिचकृतार्थास्मि ४३ अहोइत्याश्चर्येवि चित्रंवास्तवस्वरूपानुगुणंतवचेष्टितंयतः अपाणिपादोजवनोगृहीतेतिश्रुतेः वस्तुतश्चरणादिवर्जितोपिसन्संपूर्णः सर्वव्यापोपिसन् आ-



अहल्योवाच अहोकृतार्थास्मिजगन्निवासतेपादाब्जसंलग्नरजःकणादहं स्पृशामियत्पद्मजशंकरादिभिर्वि मृग्यतेरंधितमानसैःसदा ४३ आहोविचित्रंतवरामचेष्टितंमनुष्यभावेनविमोहितंजगत् चलस्यजस्रंच रणादिवर्जितःसंपूर्णआनंदमयोतिमायिकः ४४ यत्पादपंकजपरागपवित्रगात्राभागीरथीप्लवविरिंचिमुखा न्पुनाति साक्षात्सएवममहद्विषयोयदास्तेकिंवर्ण्यतेममपुराकृतभागधेयम् ४५ मर्त्यावतारमनुजाकृ तिंहरिंरामाभिधेयंरमणीयदेहिनम् धनुर्धरंपद्मविशाललोचनंभजामिनित्यंनपराम्भजिष्ये ४६ ७

नंदमयः तत्स्वरूपोपिसन्जगत् आत्मनिमनुष्यबुध्युत्पादनेनविमोहयन्मनुष्यभावेनचलसि क्रियामात्रोपलक्षणमिदं विरोधाभासोत्रऔपाधिकत्वे नतत्परिहारात् नन्वीदृशस्यमनुभावः कथंतत्राहातिमायिकइति सकलमायावन्द्योत्कृष्टः सकलजगद्रूपेणपरिणमनसमर्थः महामायावानित्य- र्थः एवंचशुद्धमायिकमेवेदंतवशरीरंचलनादि चलनवत्त्वितरवदिनिभावः ४४ यत्पादेतिविष्णोः पादप्रसूतेतिपुराणोक्तेः ४५ रमणीयदेहिनमित्यार्षं ४६



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यपादःविश्वं पादोस्यविश्वाभूतानिइतिश्रुतेः तदेवपंकजंतस्यारजःरजइवसारांशः यथाकमलेसौगंध्यसंपादकतयांतर्विद्यमानरजएवसारं एवंविश्वस्यसत्ताभानसंपादकतयाब्रह्मैवसारांशत्वाद्रजस्तुछुतिभिर्विमृग्यंश्रुतिशिरोरूपोपनिषद्गम्यत्वात्तस्येतिभावः यन्नाम्नांमध्येसारंना मरामेति तस्यरसिकस्तद्विषयप्रीतिमान् भगवान् ऐश्वर्यधर्मयशोलक्ष्मी ज्ञानवैराग्यवान् षण्णामेषां ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः ज्ञानवैराग्ययोश्चैवषण्णांभगसंज्ञकत्वोक्तेः उत्पत्तिंप्रलयंचैवभूतानामागतिंगतिं वेत्तिविद्यामविद्यांचसवाच्योभगवानित्यक्तोवा ४७ विरिंचि-लोकेब्रह्मलोके नारदमुखाऋषयः भवपद्मजाद्यादेवाश्चत्वच्चरितस्मरणजानंदाश्रुभिः सिक्तेकुचाग्रेचूचुकेतथासीमनिप्रांतभागेच यथावागे-

यत्पादपंकजरजः श्रुतिभिर्विमृग्यंयन्नाभिपंकजभवःकमलासनश्च यन्नामसाररसिकोभगवान्पुरारिस्तंराम-चंद्रमनिशंहृदिभावयामि ४७ यस्यावतारचरितानिविरिंचिलोकेगायंतिनारदमुखाभवपद्मजाद्याः आनंद-जाश्रुपरिषिक्तकुचाग्रसीमावागीश्वरीचनमहंशरणंप्रपद्ये ४८ सोयंपरात्मापुरुषःपुराणएषःस्वयंज्योतिरनंत-आद्यः मायातनुंलोकविमोहनीयांधत्तेपरानुग्रहएषरामः ४९

श्वरीसरस्वतीचगायतीतिविपरिणामेनान्वयः ४८ सोयंरामःप-रात्मापरःसर्वजीवेभ्यःप्रकृतेश्चअधिकः आत्मापुरुषःपुरिशयनात्पुरुषःपुराणः सर्वदाविद्यमानइत्यर्थः एषःस्वयंज्योतिःस्वप्रकाशःअनंतःअ विनाशी आद्यःसर्वकारणंयःपरानुग्रहेपरेषांमादृशजनानांअनुग्रहेकर्तव्यतयाबुद्धिस्थेसतिपरमसुंदरत्वादिगुणैर्लोकविमोहिनींमायातनुं नरि तरजनवत्सांचभौतिकींधत्तेसएवएषःरामःउपासकानांकामार्थंब्रह्मणोरूपकल्पनेतिश्रुतेः ४९ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयंहीति विश्वस्यजगतः उद्भवउत्पत्तिः संयमोनाशः ताभ्यांपालनमप्युपलक्ष्यते तेषांस्वतंत्रःकर्तेतिपाणिन्युक्तेः यएकएवपरिपूर्णोव्यापकआत्मा स्वमायागुणेषुरजःसत्वतमः सुबिंबितः प्रतिबिंबितः सन् विरिंच्यादिनामभेदान् धत्ते रजोगुणोपहितंचैतन्यमेवब्रह्मा सत्वगुणोपहितंविष्णुः तमोगुणयुक्तंरुद्रइतिभावः ५० हेरामयत्तवांघ्रिपंकजंप्रियात् प्रियत्वात् श्रियावक्षसिधृतंलालितंच येनैकेनजगत्त्रयमाक्रांतं इदंविष्णुर्विचक्रमेत्रेधानिदधेपदमितिश्रुतेः यच्चत्यक्ताभिमानैर्मुनिभिर्ध्येयम् तद्विष्णोःपरमंपदंसदापश्यंतिसूरयइतिश्रुतेः तस्मैनमोस्त्वित्यर्थः ५१ जगतामिति आदि

बा-कां १

अयंहिविश्वोद्भवसंयमानामेकःस्वमायागुणबिंबितोयः विरिंचिविष्णवीश्वरनामभेदान्धत्तेस्वतंत्रःपरिपूर्ण आत्मा ५० नमोस्तुतेरामतवांघ्रिपंकजंश्रियाधृतंवक्षसिलालितंप्रियात् आक्रांतमेकेनजगत्त्रयंपुराध्ये यंमुनींद्रैरभिमानवर्जितैः ५१ जगतामादिभूतस्त्वंजगत्त्वंजगदाश्रयः सर्वभूतेष्वसंयुक्त एकोभाति भवान्परः ५२

भूतःकारणत्वादितिभावः जगत्त्वं जगदनुवादेनत्वत्सदोपात्तब्रह्मात्मत्वंविधीयते सर्वंखल्विदंब्रह्मेतिवत् तत्रजगतोमिथ्याभूतत्वेनब्रह्मसामानाधिकरण्यानुपपत्तावपितस्य अध्यस्तत्वेनजगद्बाधफलकत्वान्नदोषः एवंचजगदारोपाधिष्ठानंत्वमित्यर्थः तदेवाह जगदाश्रय इति इमाःप्रजाःसदायतनाः सत्प्रतिष्ठाइतिश्रुतेः वास्तवआश्रयाश्रयिभावोनास्त्येवेत्याह सर्वभूतेष्वसंसक्तइति एवंचश्रुत्युक्तंतदधिष्ठानत्वमध्यारोपितमेवेतिभावः अतएवभवानेकोद्वितीयोभातिप्रकाशते ५२ ७ ७ ७ ७



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐकारवाच्यस्त्वं तस्यवाचकः प्रणवइतिपातंजलसूत्रात् अवतीत्योमितिनिरुपाधिकरक्षकत्वगुणेनसतद्वाच्यः यद्वा अश्वउश्वमश्वॐमितिब्र
ह्मविष्णुशिवात्मत्वेनसतद्वाच्यः तुर्येणनादाख्यध्वनिनाच शब्दब्रह्मस्वरूपतएवतत्रनिबद्धं पक्षद्वयेपि यदापिसोहमितिशब्देसकारार्णेह
कारार्णेलोपयित्वाततःपरंसंधिंकुर्यात् पूर्वरूपंततोसोप्रणवोभवेदितिरीत्याप्रणवसाधनंतदापिअहमनुवादेनतत्ताविशिष्टांतर्याम्यभेदप्र
तिपादनात्सगुणएवतदर्थः यद्वासकारहकारलोपेनतत्वाहंत्वयोस्त्यागात्शब्दमेवब्रह्मतदर्थः अत्रशक्तिग्रहादिप्रकारोन्यत्रविस्तरेणप्रपं-
चितः तर्हिकिंसगुणएवाहंनेत्याह वाचामविषयइति निर्धर्मकत्वात् शक्त्याद्यसंभवेनस्वरूपतस्तज्जन्यबोधाविषयइत्यर्थः नन्वेवंतस्यवा-

ॐकारवाच्यस्त्वंरामवाचामविषयःपुमान् वाच्यवाचकभेदेनभवानेवजगन्मयः ५३ कार्यकारणक
र्तृत्वेफलसाधनभेदतः एकोविभासिरामत्वंमायया बहुरूपया ५४

चकःप्रणवइतिपातंजलसूत्रासंगतिस्तत्राह
वाच्येति वाच्यवाचकभेदेनतत्कल्पनयाभवानेवमाययाजगन्मयइतिकल्पितभेदेनकल्पितगुणेश्वतवंवाच्यत्वंगृहीत्वापारमर्षसूत्रोपपत्ति
रितिभावः ५३ उक्तंजगन्मयत्वंमायिकमित्याह कार्येत्यादि कार्यंमहत्तत्वादि कारणंमायारूपामूलप्रकृतिः कर्तृत्वंतन्नदुपादानगोचरा-
परोक्षज्ञानचिकीर्षाकृतिमत्वं फलंस्वर्गनरकादिसाधनं कर्त्रादिवेदादि एतद्भेदतः एकोपित्वंबहुरूपयामायया उक्तभेदैर्युक्तइवभासि उक्तं
चविष्णुपुराणे सएवमूलप्रकृतिर्व्यक्तरूपीजगच्चसः तस्मिन्नेवलयंसर्वंयातितत्रचतिष्ठति कर्तानियाणांसचइज्यतेक्रतुः सएवतत्कर्मफलं
चतस्ययत् स्रुगादियत्साधनमप्यशेषतोहरेर्नकिंचिद्व्यतिरिक्तमस्तिइति ५४ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वीदृशोयद्यहंतर्हि लोकोमांतथाकिमितिनजानातीत्यत्राह त्वन्मायेति त्वद्विषयथामायथेत्यर्थः तदुक्तंविष्णुपुराणे सोहंसत्वंजगच्चेदंसदेवासुरमानुषं अविद्यामोहितात्मानःपुरुषाभिन्नदर्शिनइति ५५ ननुतर्हितादृशएवाहंनेत्याह आकाशवदिति अचलःअक्षयःबुद्धोज्ञानरूपःसत्सत्तारूपः नित्यत्वमनादित्वंअव्ययत्वमनंतत्वं ५६ मूढानमोगुणप्रधानाअतएवअज्ञानमस्कुर्यां त्वद्रूपज्ञानायेतिभावः ५७ संक्तानिरंतरा ५८ हे पुरुषाध्यक्षसकलपुरुषसाक्षिन् हृषीकेशहृषीकाणामिंद्रियाणामधिष्ठातः हृष्यंतिविषयेरितिहृषीकाणींद्रियाणि हृषीकेशंभयेषुचेतिविष्णु-

त्वन्मायामोहितधियस्त्वांनजानंतितत्वतः मानुषंत्वाभिमन्यंतेमायिनंपरमेश्वरम् ५५ आकाशवत्त्वं-
सर्वत्रबहिरंतर्गतोमलः असंगोत्यचलोनित्यःशुद्धोबुद्धःसदव्ययः ५६ योषिन्मूढाहमज्ञातेतत्त्वंजानेक
थंविभो तस्मात्तेशतशोरामनमस्कुर्यामनन्यधीः ५७ देवमेयत्रकुत्रापिस्थितोयाअपिसर्वदा त्वत्पा
दकमलेसक्ताभक्तिरेवसदास्तुमे ५८ नमस्तेपुरुषाध्यक्षनमस्तेभक्तवत्सल नमस्तेस्तुहृषीकेशना-
रायणनमोस्तुते ५९

धर्मोक्तेः भीतयाहत्ययेतन्नामस्मृतं नारंजीवसमूहः अयनंस्थानंयस्यअंतर्यामितयातत्रस्थितत्वान्नारायणः नयतीतिनरः प्रोक्तःपरमात्मासनातनः नराज्ज्ञानानितत्वानि नाराणीतितत्तोविदुः तान्येवचायनंतस्य तेननारायणःस्मृतइतिमनुः आपोनारास्तत्स्थितत्वात्वानारायणः अस्यमंत्रस्यसंसारभयनाशकत्वात् स्मरणं तदुक्तंनृसिंहपुराणे नारायणायनमइत्ययमेवसत्यंसंसारघोरविषसंहरणायमंत्रइति ५९





CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३४ राजशार्दूलंदशरथं रामश्रेयःविवाहरूपं रामकृतंधनुर्भंगं ३५ गजाश्वरथपत्तयः इतिमध्यमपदलोपीसमासः दृंहश्चेतिसूत्रेसेनांगशब्देनरथिकादी
नामेवग्रहणंनरथादीनांअतोत्रनदोषः अतएवसंग्रामंगजाश्वरथपदानिभिरिति अत्याचूतरसूत्रस्थभाष्यप्रयोगःसंगच्छतइत्यन्ये ३६ राममातृःकौस

विवाहार्थंकुमाराणांसदारःसहमंत्रिभिः तथेतिप्रेषयामासदूतांस्त्वरितविक्रमान् ३४ तेगत्वाराजशार्दूलंराम
श्रेयोन्यवेदयन् श्रुत्वारामकृतंराजाहर्षेणमहताप्लुतः ३५ मिथिलागमनार्थायत्वरयामाससंत्रिणः गच्छंतु-
मिथिलांसर्वेगजाश्वरथपत्तयः रथमानयमेशीघ्रंगच्छाम्यद्यैवमाचिरम् वसिष्ठस्त्वग्रतोयातुसदारःसहितो
ग्निभिः ३६ राममातृःसमादायमुनिर्मेभगवान्गुरुः एवंप्रस्थाप्यसकलंराजर्षिर्विपुलंरथं ३७ महत्यासेनया-
सार्धमारुह्यत्वरितोययौ आगतंराघवंश्रुत्वाराजाहर्षसमाकुलः ३८ प्रत्युज्जगामजनकःशतानंदपुरोधसा
यथोक्तपूजयापूज्यंपूजयामाससत्कृतम् ३९ रामस्तुलक्ष्मणेनाशुववंदेचरणौपितुः तस्योद्दृष्टोदशरथोरामं
वचनमब्रवीत् ४० दिष्ट्यापश्यामितेरामंमुखंफुल्लांबुजोपमम् मुनेरनुग्रहात्सर्वंसंपन्नंममशोभनम् ४१
इत्युक्त्वाघ्रायमूर्धानमालिंग्यचपुनःपुनः हर्षेणमहताविष्टोब्रह्मानंदंगतोयथा ४२

ल्याद्याः प्रस्थाप्यनगरात्बहिः संप्रेष्यरथमारुह्यतयैवसेनयासार्धंययावित्यन्वयः ३७ ३८ शतानंदपुरोधसासहेतिशेषः यथोक्तपूजयायथा
शास्त्रोक्तपूजया ३९ ४० फुल्लांबुजोपमंविकसितकमलसदृशं ४१ ब्रह्मानंदंगतःप्राप्तः समाधावितिशेषः ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४३ ४४ वितानंवासः स्रुतमंगणाच्छादनं मंडपोत्रविवाहशाला ४५ सकसंबाधेसंकीर्णे सवासिन्यःजीवन्दर्तृकाः पतकोरुचकोरुक्मोनिष्कंवक्षो
विभूषणइति कोशात् वक्षोविभूषणंनिष्कंतत्कंठेयासांताभिः ४६ भेरीदुंदुभीवाद्यविशेषो वितस्तित्रितयदीर्घाताम्रनिर्मितावर्मछत्रा चतुर्विंश



ततोजनकराजेनमंदिरेसन्निवेशितः शोभनेसर्वभोगाढ्येसदारःससुतः सखी ४३ ततःशुभेदिनेलग्नेसमुहूर्तेरघूत्तमं आनयामासधर्मज्ञोरामंसभ्रातृकंतदा ४४ रत्नस्तंभसुविस्तारेसुवितानेसुतोरणे मंडपेसर्वशोभाढ्येमुक्तापुष्पफलान्विते ४५ वेदविद्भिःसुसंबाधेब्राह्मणैःस्वर्णभूषितैः सुवासिनीभिःपरितोनिष्ककंठीभिराहृते ४६ भेरीदुंदुभिनिर्घोषैर्गीतनृत्यैःसमाकुले दिव्यरत्नांचितेस्वर्णपीठेरामंन्यवेशयत् ४७ वसिष्ठंकौशिकंचैवशतानंदःपुरोहितः यथाक्रमंपूजयित्वारामस्योभयपार्श्वयोः ४८ स्थापयित्वासतत्राग्निंज्वालयित्वायथाविधि सीतामानीयशोभाढ्यांनानारत्नविभूषिताम् ४९ सभार्योजनकःप्राप्यद्रामं राजीवलोचनम् पादौप्रक्षाल्यविधिवत्तदपोमूर्ध्न्यधारयत् ५० याधृतामूर्ध्निशर्वेणब्रह्मणामुनिभिःसदा ततःसीतांकरेधृत्वासाक्षतोदकपूर्वकं ५१ रामायप्रददौप्रीत्यापाणिग्रहविधानतः सीतांकमलपत्राक्षीस्वर्णमुक्तादिभूषिता ५२

त्यंगुलवदनह्रयाभेरीवर्तुलश्चर्मबद्धैकाननः दुंदुभिरितिवदंति रत्नांचितेरत्नघटिते ४७ रामस्योभयपार्श्वयोः स्थितं
वसिष्ठंकौशिकंचयथाक्रमंपूर्ववसिष्ठंततः कौशिकमितिक्रमेणपूजयित्वेत्यन्वयः ४८ सीतामानीयअग्रेकृत्वासभार्योजनकोरामंप्रतिप्रायादित्यन्वयः ४९
५० याः गंगारूपाः ५१ ५२



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सीतानाम्नीमेसुतानुभ्यंदीयतेप्रीतोभवेति अनेननिष्क्रमनयाभगवत्प्रीतयेदानंकृतवानितिसूच्यते ५३ रामकरेसीतामर्पयन्जनकः लक्ष्मींविष्णवेपर्यदन्
समुद्रइवमुमोद ५४ भ्रातृकन्यकेकुशध्वजकन्यके ५५ ५६ ५७ सीतामुखात् लांगलाग्रकृतभूविवरात् ५८ पुत्रिकाभावेनभावितांध्यातां५९

दीयतेमेसुतानुभ्यंप्रीतोभवरघूत्तम इतिप्रीतेनमनसासीतांरामकरेर्पयत् ५३ मुमोदजनकोलक्ष्मींक्षीरा
ब्धिरिवविष्णवे ऊर्मिलांचोरसीकन्यांलक्ष्मणायददौतदा ५४ तथैवश्रुतकीर्तिंचमांडवींभ्रातृकन्यके भर
तायददावेकांशत्रुघ्नायापरांददौ ५५ चत्वारोदारसंपन्नाभ्रातरःशुभलक्षणाः विरेजुःप्रभयासर्वेलोकपा
लाइवापरे ५६ ततोब्रवीद्वसिष्ठायविश्वामित्रायमैथिलः जनकःस्वसुतोदंतंनारदेनाभिभाषितम् ५७
यज्ञभूमिविशुध्यर्थंकर्षतोलांगलेनमे सीतासुखात्समुत्पन्नाकन्यकाशुभलक्षणा ५८ तामद्राक्षमहंप्री
त्यापुत्रिकाभावभावितां अर्पिताप्रियभार्यायैशरच्चंद्रनिभानना ५९ एकदानारदोभ्यागाद्विविक्तेमयिसं
स्थिते रणयन्महतींवीणांगायन्नारायणंविभुम् ६० पूजितःसुखमासीनोमामुवाचसुखान्वितः शृणु
श्ववचनंगुह्यंतवाभ्युदयकारणम् ६१ परमात्माहृषीकेशोभक्तानुग्रहकाम्यया देवकार्यार्थसिध्यर्थंराव
णस्यवधायच ६२ जातोरामइतिख्यातोमायामानुषवेषधृक् आस्तेदाशरथिर्भूत्वाचतुर्धापरमेश्वरः ६३

महतीमहतीसंज्ञाविश्वावसोस्तुबृहतीतुंबरोस्तुकलावती महतीनारदस्यस्यात्सरस्वत्यास्तुकच्छपीत्युक्तेः ६० ६१ ६२ चतुर्धारामलक्ष्मणभ
रतशत्रुघ्नरूपेण ६३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६४ पूर्वभार्याअनादिशक्तिः सैवविराट्रूपभरणाद्स्यभार्या देवगतिंदेवलोकमार्गं ६५ ६६ पितामहशब्देनतदादयोवंश्याः ६७ इतिचिं-
त्येत्येकंपदमितित्यपोनानुपपत्तिः इतिविचार्यतथाकृतंपणभूतंतत्कृतमित्यर्थः ६८ ६९ यत्पश्यामितन्मेजन्मसफलमित्यन्वयः ७० त्वसा



योगमायापिसीतेतिजातावेतववेश्मनि अतस्त्वंराघवायैवदेहिसीतांप्रयत्नतः ६४ नान्येभ्यःपूर्वभार्यैषारा
मस्यपरमात्मनः इत्युक्त्वाप्रययौदेवगतिंदेवमुनिस्तदा ६५ तदारभ्यमयासीताविष्णोर्लक्ष्मीर्विभाव्यते
कथंमयाराघवायदीयतेजानकीशुभा ६६ इतिचिंतासमाविष्टःकार्यमेकमचिंतयं तस्मितामहगेहेनु
न्यासभूतमिदंधनुः ६७ ईश्वरेणपुराक्षिप्तंपुरदाहादनंतरं धनुरेतत्पणंकार्यमितिचिंत्यकृतंतथा ६८ सी
तापाणिग्रहार्थायसर्वेषांमाननाशनम् त्वत्प्रसादान्मुनिश्रेष्ठरामोराजीवलोचनः ६९ आगतोत्रधनुर्द्रष्टुंफ
लितोमेमनोरथः अद्यमेसफलंजन्मरामत्वांसहसीतया ७० एकासनस्थंपश्यामिभ्राजमानंरविंयथा
त्वत्पादांबुधरोब्रह्मासृष्टिचक्रप्रवर्तकः ७१ बलिस्त्वत्पादसलिलं धृत्वाभूद्द्विजाधिपः त्वत्पादपांसुसंस्प
र्शादहल्यापतृशापतः ७२ सद्यएवविनिर्मुक्ताकोन्यस्त्वत्तोधिरक्षिता ७३ यत्पादपंकजपरागसरागयोगिहृं
दैर्जितंभवभयंजितकालचक्रैः यन्नामकीर्तनपराजितदुःखशोकादेवास्तमेवशरणंसततंप्रपद्ये ७४



अधिरक्षिता आधिक्येरक्षितेत्यर्थः ७३ यस्यरामस्यपादपंकजपरागेषुसतसंरागायेषांतैः योगिहृदैः भवभयंसंसारभयं जितं देवाः यन्नामकीर्तन पराजि
तदुःखशोकाजाताइतिशेषः ७४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममप्रतीतोसि मयाप्रत्यभिज्ञातोसीत्यर्थः ननुमत्प्रत्यभिज्ञायाः किमेवंदौर्लभ्यंयेनैवंसंभ्रमस्तत्राह ब्रह्मादिभिरिति तदलभ्यत्वेहेतुः प्रकृतेःपारगइति ३० जन्मादिषट्भावाः जायतेऽस्तिवर्धतेविपरिणमतेऽपक्षीयतेनश्यतीत्येवंरूपाः षट्भावविकाराः ते यतस्त्वंपूर्णोज्ञानेन अतः अज्ञानसंभवास्तेत्वयिनसंतिअतस्त्वंनिर्विकारः गमनादिविवर्जितश्चासि ३१ ननुतेजोहरणादिक्रियायाइदानीमेवोक्तेःकथंनिष्क्रियत्वमतआह यथेति यथाशब्देएवजलादौफेनजलादिऔपाधिकं तथात्वयिक्रियोपाधिकीत्यर्थः उपाधिमेवाह त्व

अद्यमेसफलंजन्मप्रतीतोसिममप्रभो ब्रह्मादिभिरलभ्यस्त्वंप्रकृतेःपारगोमतः ३० त्वयिजन्मादिषट्भावानसंत्यज्ञानसंभवाः निर्विकारोसिपूर्णस्त्वंगमनादिविवर्जितः ३१ यथाजलेफेनजालंधूमोवन्हौतथात्वयि त्वदाधारात्त्वद्विषयामायाकार्यंसृजत्यहो ३२ यावन्मायाहृतालोकास्तावत्त्वांनविजानते अविचारितसिद्धेषाविद्याऽविद्याविरोधिनी ३३ अविद्याकृतदेहादिसंघातेप्रतिबिंबिता चिच्छक्तिर्जीवलोकेस्मिन्जीवइत्यभिधीयते ३४

दाधारेति अन्यान्प्रतित्वामाहृणोतीतित्वद्विषया अस्वतंत्रतयात्वदधीनत्वात्त्वदाधाराचसेतिभावः ३२ उक्तंत्वद्विषयमेवदर्शयति यावदिति सावकृतस्तत्राह अविचारितसिद्धेति अनादिसिद्धाविचारणेवसिद्धेतिअनादिःसेतिभावः सेवमायाविद्याब्रह्मज्ञानंतद्विरोधिनितस्मिन्सतिनश्यति तदुत्पत्तिंप्रतिबध्नातिचातोविद्यापदेनोच्यतइत्यर्थः विद्याविद्येश्रुतिभेदेकएकत्वान्यधियोहितेइतिअभियुक्ताः ३३ कार्यंसृजत्यहोइत्युक्तंतत्कार्यंदर्शयति अविद्येति आदिनेंद्रियादितत्संघातावच्छिन्नेतःकरणेप्रतिबिंबताअनिर्वाच्येनसंबंधेनसंबद्धाचिच्छक्तिः प्राणादिप्रेरकत्वेनप्राणधारकतयाजीवइत्युच्यते जीवप्राणधारणइतिधातोः ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुचिच्छक्तेरक्रियत्वेनजीवेकर्तृत्वादिव्यवहारः कथमतआह यावदिति अभिमानः अहमितिबुद्धिः यावद्विवेकाभावमूलकोदेहादिसंघातेः
ह्मिस्यभिमानस्तावत्कर्तृत्वाद्यारोपेणतद्यानिवेत्यर्थः ३५ विशिष्टेएवकर्तृत्वादीस्फुरमर्थंप्रत्येकंतन्निषेधेनद्रढयति आत्मनइति संसृतिःक
र्तृत्वभोक्तृत्वाद्यभिमानकृतः संसारोनास्ति अपरिणामित्वादितिभावः एवंबुद्ध्यैज्ञानंनजडत्वादितिभावः तस्मात्तद्द्वयंयुक्त्वा अहमितिबु
ध्यागृहीत्वातत्रहेतुः अविवेकः संसारीजीवइति अहंकर्ताभोक्तेत्यादिरूपेणप्रवर्तते व्यवहरति तदुक्तं नबुद्धेरेवबोधोस्ति नात्मनोविद्यतेक्वि

यावद्देहमनःप्राणबुध्यादिष्वभिमानवान् तावत्कर्तृत्वभोक्तृत्वस्फुरद्दुःखादिभाग्भवेत् ३५ आत्मनः
संसृतिर्नास्तिबुद्धेर्ज्ञानंनजात्विति अविवेकाद्द्वयंयुक्त्वासंसारीतिप्रवर्तते ३६ जडस्यचित्समोयोगाच्चि
त्स्वंभूयाच्चितेस्तथा जडसंगाज्जडत्वंहिजलाग्न्योर्मेलनंयथा ३७ यावत्त्वत्साद्भक्तानांसंगसौख्यंनविं
दति तावत्संसारदुःखौघान्ननिवर्तेन्नरःसदा ३८ या अतोनान्यतरस्यापिजानातीतितुयुज्यतइति ३६ नन्वेवंबुद्धे

श्चितीसंज्ञानइति धातुनिष्पन्नचित्तव्यवहारानुपपत्तिरतआह जडस्येति नन्वेवमहमज्ञइतिव्यवहारानुपपत्तिरतआह तथाचितेर्जड
संयोगाज्जडत्वं संमेलनेमिथोन्योन्यधर्मेतिरोभावेदृष्टांतमाह जलाग्न्योः मेघेविद्युज्जलयोर्यथेत्यर्थः विद्युतः प्रकाशंजातमपिजलंआद्र
णोति जलस्वरूपंजडमपिअग्निसंयोगाद्विद्युद्रूपेणप्रकाशरूपतांप्राप्नोतीत्यर्थः ३७ नन्वेवंयदिसंसृतस्तर्हिकथंमुच्यतेत्यत्राह यावदिति सं
गसौख्यंसंगाज्जायमानंसुखंनविंदतिनप्राप्नोतीतावदित्यर्थः सौख्यमितिस्वार्थेष्यञ् निवर्तेदिति परस्मैपदमार्षम् ३८ ७ ७



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सतांसंगेनलब्ध्याभक्त्यात्वांयदाजनाः समुपासतेतदातेभ्योमायाशनैर्मेदंयातिअपसरतिविक्षेपशक्तिंत्यजतीत्यर्थः अतएवसातानवं
प्रतिपद्यते ३९ तवज्ञानमभेदेनयत्तद्यक्तः सद्गुरुस्त्वद्भक्तियोगात्तेनलभ्यते तदनंतरंतादृशगुरोः सकाशाद्वाक्यज्ञानंतत्वमसीतिवा
क्यार्थारवंडार्थज्ञानंत्वत्प्रसादात्लब्ध्वाविमुच्यते आचार्यवान्पुरुषोवेदेतिश्रुतेः उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्वदर्शिनइतिस्मृतेश्च
४० मुक्तिशंकामुक्तिप्राप्तिसंभावनापिन स्फुरंतथानैवेत्यर्थः ४१ भक्तिकारणंभक्तिमत्संगः याभ्यांभक्तिमत्संगतज्जन्यभक्तिभ्या-

सत्संगलब्ध्याभक्त्यायदात्वांसमुपासते तदामायाशनैर्यातितानवंप्रतिपद्यते ३९ ततस्त्वज्ज्ञानसंपन्नः
सद्गुरुस्तेनलभ्यते वाक्यज्ञानंगुरोर्लब्ध्वात्वत्प्रसादाद्विमुच्यते ४० तस्मात्त्वद्भक्तिहीनानांकल्पकोटि-
शतैरपि नमुक्तिशंकाविज्ञानशंकानैवस्फुरंतथा ४१ अतस्त्वत्पादयुगलेभक्तिर्मेजन्मजन्मनि स्या-
त्त्वद्भक्तिमतांसंगोविद्यायाभ्यांविनश्यति ४२ लोकेत्वद्भक्तिनिरतास्त्वद्धर्मामृतवर्षिणः पुनंतिलोकम
खिलंकिंपुनःस्वकुलोद्भवान् ४३ नमोस्तुजगतांनाथनमस्तेभक्तिभावन नमःकारुणिकानंतरामचंद्र-
नमोस्तुते ४४ देवयद्यत्कृतंपुण्यंमयालोकजिगीषया तत्सर्वंतवबाणायभूयाद्रामनमोस्तुते ४५

मविद्यासाक्षात्सरंपरयाचमिलित्वानश्यति ४२ स्त्वत्धर्मस्त्वज्ज्ञानंतद्रूपामृतवर्षणशीलास्तदुपदेशरस्तेनतेषांतत्वमर्थासिद्धं ४३ कारुणि
केतिसंबोधनंप्रकृतोपयोगाय ४४ तवबाणायभूयात् त्वद्बाणनाश्यंभूयादित्यर्थः अनेनसर्वकर्मक्षयेणमुक्तिंदेहीतिव्यंग्यं ४५ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तव्यंग्यंबुध्वातद्दानंभगवान्प्रतिजानीते ततइत्यादि ४६ अत्रत्वत्कामदाने ४७ सोपिमुक्तिकारणसंपदंप्रार्थयते यदीति मधुसू-
दनेत्यनेनमोक्षप्रतिबंधकमत्कर्मनाशनेत्वंसमर्थइतिव्यज्यते ४८ विज्ञानंत्वदभेदेसाक्षात्कारः इदंभक्तिफलंयदिकदाचिददन



ततःप्रसन्नोभगवान्श्रीरामःकरुणामयः प्रसन्नोस्मितवब्रह्मन्यत्तेमनसिवर्तते ४६ दास्येनदखिलं
कामंमाकुरुष्वात्रसंशयम् ततःप्रीतेनमनसाभार्गवोराममब्रवीत् ४७ यदिमेनुग्रहोरामतवास्तिमधु-
सूदन त्वद्भक्तसंगस्त्वत्तोदृढाभक्तिःसदास्तुमे ४८ स्तोत्रमेतत्पठेद्यस्तुभक्तिहीनोपिसर्वदा त्वद्भ-
क्तिस्तस्यविज्ञानंभूयादंतेस्मृतिस्तव ४९ तथेतिराघवेणोक्तःपरिक्रम्यप्रणम्यतं पूजितस्तदनुज्ञातो
महेंद्राचलमन्वगात् ५० राजादशरथोदृष्टोरामंमृतमिवागतं आलिंग्यालिंग्यहर्षेणनेत्राभ्यांजलमु
त्सृजत् ५१ ततःप्रीतेनमनसास्वस्थचित्तःपुरंययौ रामलक्ष्मणशत्रुघ्नभरतादेवसंमिताः ५२ स्वां
स्वांभार्यामुपादायरेमिरेस्वस्वमंदिरे मातापितृभ्यांसंदृष्टोरामःसीतासमन्वितः ५३

स्यात्तर्हिअंतेमरणकालेतवस्मृतिरवश्यंभूयादितिलोकोपकारायप्रार्थयते अंतेयामतिःसागतिरितिन्यायात्तत्स्मृतौतल्लाभोवश्यं-
भावीतिभावः ४९ ५० मृतमिवागतंक्षत्रियकुलांतकात्परावर्तनतया संभावनाउत्सृजदित्यर्थः अडभावआर्षः ५१ देव
संमिताः देवतुल्याः ५२ ५३ ॐ ॐ ॐ ॐ ॐ ॐ



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साकेनेअयोध्यायां लोकनाथेषुप्रथिताः प्रसिद्धागुणगणायस्यसः लोकैःसम्यग्गीताकीर्तिर्यस्य सकलजनसमूहस्यानंदसमूहरू
पामूर्तिर्यस्य शतगुणानंदत्वात्तस्येतिभावः नित्यश्रीःपराशक्तिर्यस्य अतएवनिरवधिविभवः नित्यंमायायाआवरणशक्तिरू-
पायानिरासोयस्मात् मायासर्वथायंत्रयत्सावरिकेतिभावः मायाकार्यंसर्वमनुसरतिसत्तास्फूर्तिभ्यांव्याप्नोति तादृशःदेवोपि

साकेनेलोकनाथप्रथितगुणगणोलोकसंगीतकीर्तिः श्रीरामःसीतयास्तेखिलजननिकरानंदसंदोहमू
र्तिः नित्यश्रीर्निर्विकारोनिरवधिविभवोनित्यमायानिरासोमायाकार्यानुसारीमनुजइवसदाभातिदेवो,
खिलेशः ५७ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेबालकांडेसप्तमःसर्गः ७

अखिलेशोपिमायायैवयोमनुजइवभाति ५७ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमान
स्यहिम्मतिवर्मणःपुत्रस्यश्रीरामवर्मणःकृतोअध्यात्मरामायणसतौबालकांडेसप्तमःसर्गःसमाप्तः ७ अध्या
त्मबालकांडेचसर्गाःसप्तैवशंभुना दिशःषष्युत्तरत्रिंशत्श्लोकामोक्षप्रदानृणाम् १ ५ ७



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ राघवो धावा ॥

॥ इतिश्रीअध्यात्मरामायणेबालकांडः समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=18.10.19 10:18
,TRANSFERRED=2019/10/18 at 10:27:03
,PAGES=40
,TYPE=STD
,NAME=S0002069
,Book Name=M-444D-ADHYATAMRAMAYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection